# shrI shAradA bhujangaprayAta stavanam

# શ્રીશારદાભુજઙ્ગપ્રયાતસ્તવનમ્

## Document Information

Text title : shrii shaaradaa bhujaNgaprayaata stavanam

File name : shAradAbhujanga.itx

Category : devii, sarasvatI, bhujanga, devI

Location : doc_devii

Author : Traditional

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : April 17, 2002

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીશારદાભુજઙ્ગપ્રયાતસ્તવનમ્

॥ દક્ષિણામ્નાય શ્રિઙ્ગેરી શ્રીશારદાપીઠાધિપતિ
શઙ્કરાચાર્ય જગદ્ગુરુવર્યો શ્રી સચ્ચિદાનન્દ શિવાભિનવ
નૃસિંહભારતી મહાસ્વામિભિઃ વિરચિતમ્ ॥

ૐ સ્મિતોદ્ધૂતરાકા નિશાનાયકાયૈ કપોલપ્રભાનિર્જિતાદર્શકાયૈ ।
સ્વનેત્રાવધૂતાઙ્ગજાતધ્વજાયૈ સરોજોત્થ સત્યૈ નમઃ શારદાયૈ ॥

ભવામ્બોધિપારં ન યન્ત્યૈ સ્વભક્તાન્ વિનાઽયાસલેશં કૃપાનૌકયૈવ ।
ભવામ્ભોજનેત્રાદિ સમ્સેવિતાયૈ અજસ્રં હિ કુર્મો નમઃ શારદાયૈ ॥

સુધાકુમ્ભમુદ્રાવિરાજત્કરાયૈ વ્યથાશૂન્યચિત્તૈઃ સદા સેવિતાયૈ ।
ક્ષુધાકામલોભાદિનિર્વાપણાયૈ વિધાતૃપ્રિયાયૈ નમઃ શારદાયૈ ॥

નતેષ્ટપ્રદાનાય ભૂમિં ગતાયૈ ગતેનાચ્છબર્હાભિમાનં હરંત્યૈ ।
સ્મિતેનેન્દુ દર્પં ચ તોષાં વ્રજન્ત્યૈ સુતેનેવ નમ્રૈર્નમઃ શારદાયૈ ॥

નતાલીયદારિદ્ર્યદુઃખાપહન્ત્ર્યૈ તથાભીતિભૂતાદિબાધાહરાયૈ ।
ફણીન્દ્રાભવેણ્યૈ ગિરીન્દ્રસ્તનાયૈ વિધાતૃપ્રિયાયૈ નમઃ શારદાયૈ ॥

સુધાકુમ્ભમુદ્રાક્ષમાલાવિરાજત્ કરાયૈ કરામ્ભોજસમ્મર્દિતાયૈ ।
સુરાણાં વરાણાં સદા માનિનીનાં મુદા સર્વદાયૈ નમઃ શારદાયૈ ॥

સમસ્તૈશ્ચ વેદૈઃ સદાગીતકીર્ત્યૈ નિરાશાન્તરઙ્ગામ્બુજાત સ્થિતાયૈ ।
પુરારાતિ પદ્માક્ષ પદ્મોદ્ભવાદ્યૈર્મુદા પૂજિતાયૈ નમઃ શારદાયૈ ॥

અવિદ્યાપદુદ્ધાર બદ્ધાદરાયૈ તથા બુદ્ધિ સમ્પત્પ્રદાનોત્સુકાયૈ ।
નતેભ્યઃ કદાચિત્સ્વપાદામ્બુજાતે વિધેઃ પુણ્યતત્યૈ નમઃ શારદાયૈ ॥

પદામ્ભોજનમ્રાન્ કૃતેભીતભીતાન્ દ્રુતં મૃત્યુભીતેર્વિમુક્તાન્ વિધાતુમ્ ।
સુધાકુમ્ભમુદ્રાક્ષમાલા કરાયૈ દ્રુતં પાયયિત્વા યથા તૃપ્તિ વાણી ॥

મહાન્તો હિ મહ્યં હૃદમ્ભોરુહાણિ પ્રમોદાત્સમર્પ્યાસતે સૌખ્યભાજઃ ।

ઇતિ ખ્યાપનાયાનતાનાં કૃપાબ્ધે સરોજાન્યસંખ્યાનિ ધત્સે કિમમ્બ ॥

શરચ્ચન્દ્રનીકાશવસ્ત્રેણવીતા કનદ્ભર્મયષ્ટેરહઙ્કાર ભેત્રી ।
કિરીટં સતાટઙ્કમત્યન્તરમ્યં વહન્તિ હૃદબ્જે સ્ફુરત્વં સુમૂર્તિઃ ॥

નિગૃહ્યાક્ષવર્ગં તપોવાણિ કર્તું ન શક્નોમિ યસ્યાદવશ્યાક્ષવર્ગઃ ।
તતો મય્યનાથે દયા પારશૂન્યા વિધેયા વિધાતૃપ્રિયે શારદામ્બ ॥

વિલોક્યાપિ લોકો ન તૃપ્તિં પ્રયાતિ પ્રસન્નં મુખેન્દું કલઙ્કાદિશૂન્યમ્ ।
યદીયં ધ્રુવં પ્રત્યહં તાં કૃપાબ્ધિં ભજે શારદામ્બામજસ્રમ્મદમ્બામ્ ॥

પુરા ચન્દ્રચૂડો ધૃતાચાર્યરૂપો ગિરૌ શ઼ૃઙ્ગપૂર્વે પ્રતિષ્ઠાપ્ય ચક્રે ।
સમારાધ્ય મોદં યયૌ યામપારં ભજે શારદામ્બામજસ્રમ્મદમ્બામ્ ॥

ભવામ્બોધિપારં નયન્તીં સ્વભક્તાન્ ભવામ્ભોજનેત્રાજસમ્પૂજ્યમાનામ્ ।
ભવદ્ભવ્યભૂતાઘ વિધ્વંસદક્ષાં ભજે શારદામ્બામજસ્રમ્મદમ્બામ્ ॥

વરાક ત્વરા કા તવેષ્ટપ્રદાને કથં પુણ્યહીનાય તુભ્યં દદાનિ ।
ઇતિ ત્વં ગિરાં દેવિ મા બ્રૂહિ યસ્માદઘારણ્યદાવાનલેતિ પ્રસિદ્ધા ॥ ૐ ॥

---

Encoded by R. Harshananda harshanand_16@rediffmail.com

---

*shrI shAradA bhujangaprayAta stavanam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*